स्थापयति तस्मात् तस्माथ् स्थापयति स्थापयति तस्मा दश्वा दश्वात् तस्माथ् स्थापयति स्थापयति तस्मा दश्वात् ।

(50)[P5] 5.1.2.1(43)- तस्मात् । अश्वात् । गर्दभः ।

तस्मा दश्वा दश्वात् तस्मात् तस्मा दश्वाद् गर्दभो गर्दभो ऽश्वात् तस्मात् तस्मा दश्वाद् गर्दभः ।

(51)[P5] 5.1.2.1(44)– अश्वात् । गर्दभः । असत्तरः ।

अश्वाद् गर्दभो गर्दभो ऽश्वा दश्वाद् गर्दभो ऽसत्तरो ऽसत्तरो गर्दभो ऽश्वा दश्वाद् गर्दभो ऽसत्तरः ।

(52)[P5] 5.1.2.1(45)– गर्दभः । असत्तरः । योगेयोगे ।

गर्दभो ऽसत्तरो ऽसत्तरो गर्दभो गर्दभो ऽसत्तरो योगेयोगे योगेयोगे ऽसत्तरो गर्दभो गर्दभो ऽसत्तरो योगेयोगे ।

(53)[P5] 5.1.2.1(46)– असत्तरः । योगेयोगे । तवस्तरम् ।

असत्तरो योगेयोगे योगेयोगे ऽसत्तरो ऽसत्तरो योगेयोगे तवस्तरम् तवस्तरं ँयोगेयोगे ऽसत्तरो ऽसत्तरो योगेयोगे तवस्तरम् ।

(54)[P5] 5.1.2.1(46)– असत्तरः ।

असत्तर इत्यसत् – तरः ।

(55)[P5] 5.1.2.1(47)– योगेयोगे । तवस्तरम् । इति ।

योगेयोगे तवस्तरम् तवस्तरं ँयोगेयोगे योगेयोगे तवस्तर मितीति तवस्तरं ँयोगेयोगे योगेयोगे तवस्तर मिति ।

(56)[P5] 5.1.2.1(47)– योगेयोगे ।

योगेयोग इति योगे – योगे ।

(57)[P5] 5.1.2.1(48)– तवस्तरम् । इति । आह ।

तवस्तर मितीति तवस्तरम् तवस्तर मित्याहाहेति तवस्तरम् तवस्तर मित्याह ।

(58)[P5] 5.1.2.1(48)– तवस्तरम् ।

तवस्तरमिति तवः – तरम् ।

(59)[P5] 5.1.2.1(49)- इति । आह । योगेयोगे ।

इत्याहाहे तीत्याह योगेयोगे योगेयोग आहे तीत्याह योगेयोगे ।

(60)[P5] 5.1.2.1(50)- आह । योगेयोगे । एव ।

आह योगेयोगे योगेयोग आहाह योगेयोग एवैव योगेयोग आहाह योगेयोग एव ।

(1)[P6] 5.1.2.2(1)- योगेयोगे । एव । एनम् ।

योगेयोग एवैव योगेयोगे योगेयोग एवैन मेन मेव योगेयोगे योगेयोग एवैनम् ।

(2)[P6] 5.1.2.2(1)- योगेयोगे ।

योगेयोग इति योगे - योगे ।

(3)[P6] 5.1.2.2(2)- एव । एनम् । युङ्क्ते ।

एवैन मेन मेवैवैनं ँयुङ्क्ते युङ्क्त एन मेवैवैनं ँयुङ्क्ते ।

(4)[P6] 5.1.2.2(3)- एनम् । युङ्क्ते । वाजेवाजे ।

एनं ँयुङ्क्ते युङ्क्त एन मेनं ँयुङ्क्ते वाजेवाजे वाजेवाजे युङ्क्त एन मेनं ँयुङ्क्ते वाजेवाजे ।

(5)[P6] 5.1.2.2(4)- युङ्क्ते । वाजेवाजे । हवामहे ।

युङ्क्ते वाजेवाजे वाजेवाजे युङ्क्ते युङ्क्ते वाजेवाजे हवामहे हवामहे वाजेवाजे युङ्क्ते युङ्क्ते वाजेवाजे हवामहे ।

(6)[P6] 5.1.2.2(5)- वाजेवाजे । हवामहे । इति ।

वाजेवाजे हवामहे हवामहे वाजेवाजे वाजेवाजे हवामह इतीति हवामहे वाजेवाजे वाजेवाजे हवामह इति ।

(7)[P6] 5.1.2.2(5)- वाजेवाजे ।

वाजेवाज इति वाजे - वाजे ।

(8)[P6] 5.1.2.2(6)- ह॒वा॒म॒हे॒ । इति॑ । आ॒ह॒ ।

ह॒वा॒म॒ह॒ इती॑ति हवामहे हवामह॒ इत्या॑हा॒हे॑ति हवामहे हवामह॒ इत्या॑ह ।

(9)[P6] 5.1.2.2(7)- इति॑ । आ॒ह॒ । अन्न᳚म् ।

इत्या॑हा॒हेती त्या॒हान्न॒ मन्न॑ मा॒हेती त्या॒हान्न᳚म् ।

(10)[P6] 5.1.2.2(8)- आ॒ह॒ । अन्न᳚म् । वै ।

आ॒हान्न॒ मन्न॑ माहा॒ हान्नं॒ ँवै वा अन्न॑ माहा॒ हान्नं॒ ँवै ।

(11)[P6] 5.1.2.2(9)- अन्न᳚म् । वै । वाज॑ः ।

अन्नं॒ ँवै वा अन्न॒ मन्नं॒ ँवै वाजो॒ वाजो॒ वा अन्न॒ मन्नं॒ ँवै वाज॑ः ।

(12)[P6] 5.1.2.2(10)- वै । वाज॑ः । अन्न᳚म् ।

वै वाजो॒ वाजो॒ वै वै वाजो ऽन्न॒ मन्नं॒ ँवाजो॒ वै वै वाजो ऽन्न᳚म् ।

(13)[P6] 5.1.2.2(11)- वाज॑ः । अन्न᳚म् । ए॒व ।

वाजो ऽन्न॒ मन्नं॒ ँवाजो॒ वाजो ऽन्न॑ मे॒वैवान्नं॒ ँवाजो॒ वाजो ऽन्न॑ मे॒व ।

(14)[P6] 5.1.2.2(12)- अन्न᳚म् । ए॒व । अव॑ ।

अन्न॑ मे॒वैवान्न॒ मन्न॑ मे॒वावा वै॒वान्न॒ मन्न॑ मे॒वाव॑ ।

(15)[P6] 5.1.2.2(13)- ए॒व । अव॑ । रु॒न्धे॒ ।

ए॒वावा वै॒वै वाव॑ रुन्धे रु॒न्धे ऽवै॒वै वाव॑ रुन्धे ।

(16)[P6] 5.1.2.2(14)- अव॑ । रु॒न्धे॒ । सखा॑यः ।

अव॑ रुन्धे रु॒न्धे ऽवाव॑ रुन्धे॒ सखा॑यः॒ सखा॑यो रुन्धे ऽवाव॑ रुन्धे॒ सखा॑यः ।

(17)[P6] 5.1.2.2(15)- रु॒न्धे॒ । सखा॑यः । इन्द्र᳚म् ।

रु॒न्धे॒ सखा॑यः॒ सखा॑यो रुन्धे रुन्धे॒ सखा॑य॒ इन्द्र॒ मिन्द्र॒(ग्म्॒) सखा॑यो रुन्धे रुन्धे॒ सखा॑य॒ इन्द्र᳚म् ।

(18)[P6] 5.1.2.2(16)– सखा॑यः । इन्द्र᳚म् । ऊ॒तये᳚ ।

सखा॑य॒ इन्द्र॒ मिन्द्र॒(ग्म्॒) सखा॑यः॒ सखा॑य॒ इन्द्र॑ मू॒तय॑ ऊ॒त॒य॒ इन्द्र॒(ग्म्॒) सखा॑यः॒ सखा॑य॒ इन्द्र॑ मू॒तये᳚ ।

(19)[P6] 5.1.2.2(17)– इन्द्र᳚म् । ऊ॒तये᳚ । इति॑ ।

इन्द्र॑ मू॒तय॑ ऊ॒त॒य॒ इन्द्र॒ मिन्द्र॑ मू॒त॒य॒ इती त्यू॒तय॑ इन्द्र॒ मिन्द्र॑ मू॒त॒य॒ इति॑ ।

(20)[P6] 5.1.2.2(18)– ऊ॒तये᳚ । इति॑ । आ॒ह॒ ।

ऊ॒त॒य॒ इती त्यू॒तय॑ ऊ॒त॒य॒ इत्या॑हा॒हे त्यू॒तय॑ ऊ॒त॒य॒ इत्या॑ह ।

(21)[P6] 5.1.2.2(19)– इति॑ । आ॒ह॒ । इ॒न्द्रि॒यम् ।

इत्या॑हा॒हेती त्या॑हेन्द्रि॒य मि॑न्द्रि॒य मा॒हेती त्या॑हेन्द्रि॒यम् ।

(22)[P6] 5.1.2.2(20)– आ॒ह॒ । इ॒न्द्रि॒यम् । ए॒व ।

आ॒हे॒न्द्रि॒य मि॑न्द्रि॒य मा॑हा हेन्द्रि॒य मे॒वैवेन्द्रि॒य मा॑हा हेन्द्रि॒य मे॒व ।

(23)[P6] 5.1.2.2(21)– इ॒न्द्रि॒यम् । ए॒व । अव॑ ।

इ॒न्द्रि॒य मे॒वैवे न्द्रि॒य मि॑न्द्रि॒य मे॒वावा वै॒वेन्द्रि॒य मि॑न्द्रि॒य मे॒वाव॑ ।

(24)[P6] 5.1.2.2(22)– ए॒व । अव॑ । रु॒न्धे॒ ।

ए॒वावा वै॒वै वाव॑ रुन्धे रु॒न्धे ऽवै॒वैवाव॑ रुन्धे ।

(25)[P6] 5.1.2.2(23)– अव॑ । रु॒न्धे॒ । अ॒ग्निः ।

अव॑ रुन्धे रु॒न्धे ऽवाव॑ रुन्धे॒ ऽग्नि र॒ग्नी रु॒न्धे ऽवाव॑ रुन्धे॒ ऽग्निः ।

(26)[P6] 5.1.2.2(24)– रु॒न्धे॒ । अ॒ग्निः । दे॒वे॑भ्यः ।

रु॒न्धे॒ ऽग्नि र॒ग्नी रु॑न्धे रुन्धे॒ ऽग्निर् दे॒वे॑भ्यो दे॒वेभ्यो॒ ऽग्नी रु॑न्धे रुन्धे॒ ऽग्निर् दे॒वे॑भ्यः ।

(27)[P6] 5.1.2.2(25)– अ॒ग्निः । दे॒वेभ्यः॑ । निला॑यत ।

अ॒ग्निर् दे॒वेभ्यो॑ दे॒वेभ्यो॒ ऽग्नि र॒ग्निर् दे॒वेभ्यो॒ निला॑यत॒ निला॑यत दे॒वेभ्यो॒ ऽग्नि र॒ग्निर् दे॒वेभ्यो॒ निला॑यत ।

(28)[P6] 5.1.2.2(26)– दे॒वेभ्यः॑ । निला॑यत । तम् ।

दे॒वेभ्यो॒ निला॑यत॒ निला॑यत दे॒वेभ्यो॑ दे॒वेभ्यो॒ निला॑यत॒ तम् तम् निला॑यत दे॒वेभ्यो॑ दे॒वेभ्यो॒ निला॑यत॒ तम् ।

(29)[P6] 5.1.2.2(27)– निला॑यत । तम् । प्र॒जाप॑तिः ।

निला॑यत॒ तम् तम् निला॑यत॒ निला॑यत॒ तम् प्र॒जाप॑तिः प्र॒जाप॑ति॒ स्तम् निला॑यत॒ निला॑यत॒ तम् प्र॒जाप॑तिः ।

(30)[P6] 5.1.2.2(28)– तम् । प्र॒जाप॑तिः । अनु॑ ।

तम् प्र॒जाप॑तिः प्र॒जाप॑ति॒ स्तम् तम् प्र॒जाप॑ति॒ रन्वनु॑ प्र॒जाप॑ति॒ स्तम् तम् प्र॒जाप॑ति॒ रनु॑ ।

(31)[P6] 5.1.2.2(29)– प्र॒जाप॑तिः । अनु॑ । अ॒वि॒न्द॒त् ।

प्र॒जाप॑ति॒ रन्वनु॑ प्र॒जाप॑तिः प्र॒जाप॑ति॒ रन्वविन्द दविन्द॒ दनु॑ प्र॒जाप॑तिः प्र॒जाप॑ति॒ रन्वविन्दत् ।

(32)[P6] 5.1.2.2(29)– प्र॒जाप॑तिः ।

प्र॒जाप॑ति॒रिति॑ प्र॒जा – प॒तिः॒ ।

(33)[P6] 5.1.2.2(30)– अनु॑ । अ॒वि॒न्द॒त् । प्रा॒जा॒प॒त्यः ।

अन्व॑विन्द दविन्द॒ दन्वन् व॑विन्दत् प्राजाप॒त्यः प्रा॑जाप॒त्यो॑ ऽविन्द॒ दन्वन् व॑विन्दत् प्राजाप॒त्यः ।

(34)[P6] 5.1.2.2(31)– अ॒वि॒न्द॒त् । प्रा॒जा॒प॒त्यः । अश्वः॑ ।

अ॒वि॒न्द॒त् प्रा॒जा॒प॒त्यः प्रा॑जाप॒त्यो॑ ऽविन्द दविन्दत् प्राजाप॒त्यो ऽश्वो ऽश्वः॑ प्राजाप॒त्यो॑ ऽविन्द दविन्दत् प्राजाप॒त्यो ऽश्वः॑ ।

(35)[P6] 5.1.2.2(32)– प्राजापत्यः । अश्वः । अश्वेन ।

प्राजापत्यो ऽश्वो ऽश्वः प्राजापत्यः प्राजापत्यो ऽश्वो ऽश्वेना श्वेना श्वः प्राजापत्यः प्राजापत्यो ऽश्वो ऽश्वेन ।

(36)[P6] 5.1.2.2(32)– प्राजापत्यः ।

प्राजापत्य इति प्राजा – पत्यः ।

(37)[P6] 5.1.2.2(33)– अश्वः । अश्वेन । सम् ।

अश्वो ऽश्वेना श्वेना श्वो ऽश्वो ऽश्वेन स(ग्म्) स मश्वेना श्वो ऽश्वो ऽश्वेन सम् ।

(38)[P6] 5.1.2.2(34)– अश्वेन । सम् । भरति ।

अश्वेन स(ग्म्) स मश्वेना श्वेन सम् भरति भरति स मश्वेना श्वेन सम् भरति ।

(39)[P6] 5.1.2.2(35)– सम् । भरति । अनुवित्त्यै ।

सम् भरति भरति स(ग्म्) सम् भर त्यनुवित्त्या अनुवित्त्यै भरति स(ग्म्) सम् भर त्यनुवित्त्यै ।

(40)[P6] 5.1.2.2(36)– भरति । अनुवित्त्यै । पापवस्यसम् ।

भर त्यनुवित्त्या अनुवित्त्यै भरति भर त्यनुवित्त्यै पापवस्यसम् पापवस्यस मनुवित्त्यै भरति भर त्यनुवित्त्यै पापवस्यसम् ।

(41)[P6] 5.1.2.2(37)– अनुवित्त्यै । पापवस्यसम् । वै ।

अनुवित्त्यै पापवस्यसम् पापवस्यस मनुवित्त्या अनुवित्त्यै पापवस्यसं ँवै वै पापवस्यस मनुवित्त्या अनुवित्त्यै पापवस्यसं ँवै ।

(42)[P6] 5.1.2.2(37)– अनुवित्त्यै ।

अनुवित्त्या इत्यनु – वित्त्यै ।

(43)[P6] 5.1.2.2(38)– पापवस्यसम् । वै । एतत् ।

पापवस्यसं वै वै पापवस्यसम् पापवस्यसं वा एत देतद् वै पापवस्यसम् पापवस्यसं वा एतत् ।

(44)[P6] 5.1.2.2(38)– पापवस्यसम् ।

पापवस्यसमिति पाप – वस्यसम् ।

(45)[P6] 5.1.2.2(39)– वै । एतत् । क्रियते ।

वा एत देतद् वै वा एतत् क्रियते क्रियत एतद् वै वा एतत् क्रियते ।

(46)[P6] 5.1.2.2(40)– एतत् । क्रियते । यत् ।

एतत् क्रियते क्रियत एत देतत् क्रियते यद् यत् क्रियत एत देतत् क्रियते यत् ।

(47)[P6] 5.1.2.2(41)– क्रियते । यत् । श्रेयसा ।

क्रियते यद् यत् क्रियते क्रियते यच्छ्रेयसा श्रेयसा यत् क्रियते क्रियते यच्छ्रेयसा ।

(48)[P6] 5.1.2.2(42)– यत् । श्रेयसा । च ।

यच्छ्रेयसा श्रेयसा यद् यच्छ्रेयसा च च श्रेयसा यद् यच्छ्रेयसा च ।

(49)[P6] 5.1.2.2(43)– श्रेयसा । च । पापीयसा ।

श्रेयसा च च श्रेयसा श्रेयसा च पापीयसा पापीयसा च श्रेयसा श्रेयसा च पापीयसा ।

(50)[P6] 5.1.2.2(44)– च । पापीयसा । च ।

च पापीयसा पापीयसा च च पापीयसा च च पापीयसा च च पापीयसा च ।

(51)[P6] 5.1.2.2(45)– पापीयसा । च । समानम् ।

पापीयसा च च पापीयसा पापीयसा च समान(ग्म्) समानम् च पापीयसा पापीयसा च समानम् ।

(52)[P6] 5.1.2.2(46)- च । समानम् । कर्म ।

च समान(ग्म्) समानम् च च समानम् कर्म कर्म समानम् च च समानम् कर्म ।

(53)[P6] 5.1.2.2(47)- समानम् । कर्म । कुर्वन्ति ।

समानम् कर्म कर्म समान(ग्म्) समानम् कर्म कुर्वन्ति कुर्वन्ति कर्म समान(ग्म्) समानम् कर्म कुर्वन्ति ।

(54)[P6] 5.1.2.2(48)- कर्म । कुर्वन्ति । पापीयान् ।

कर्म कुर्वन्ति कुर्वन्ति कर्म कर्म कुर्वन्ति पापीयान् पापीयान् कुर्वन्ति कर्म कर्म कुर्वन्ति पापीयान् ।

(55)[P6] 5.1.2.2(49)- कुर्वन्ति । पापीयान् । हि ।

कुर्वन्ति पापीयान् पापीयान् कुर्वन्ति कुर्वन्ति पापीयान्. हि हि पापीयान् कुर्वन्ति कुर्वन्ति पापीयान्. हि ।

(56)[P6] 5.1.2.2(50)- पापीयान् । हि । अश्वात् ।

पापीयान्. हि हि पापीयान् पापीयान् ह्यश्वा दश्वा द्धि पापीयान् पापीयान् ह्यश्वात् ।

(1)[P7] 5.1.2.3(1)- हि । अश्वात् । गर्दभः ।

ह्यश्वा दश्वाद् धि ह्यश्वाद् गर्दभो गर्दभो ऽश्वा द्धि ह्यश्वाद् गर्दभः ।

(2)[P7] 5.1.2.3(2)- अश्वात् । गर्दभः । अश्वम् ।

अश्वाद् गर्दभो गर्दभो ऽश्वा दश्वाद् गर्दभो ऽश्व मश्वम् गर्दभो ऽश्वा दश्वाद् गर्दभो ऽश्वम् ।

(3)[P7] 5.1.2.3(3)- गर्दभः । अश्वम् । पूर्वम् ।

गर्दभो ऽश्व मश्वम् गर्दभो गर्दभो ऽश्वम् पूर्वम् पूर्व मश्वम् गर्दभो गर्दभो ऽश्वम् पूर्वम् ।

(4)[P7] 5.1.2.3(4)- अश्वम् । पूर्वम् । नयन्ति ।

अश्वम् पूर्वम् पूर्व मश्व मश्वम् पूर्वम् नयन्ति नयन्ति पूर्व मश्व मश्वम् पूर्वम् नयन्ति ।

(5)[P7] 5.1.2.3(5)– पूर्वम् । नयन्ति । पापवस्यसस्य ।

पूर्वम् नयन्ति नयन्ति पूर्वम् पूर्वम् नयन्ति पापवस्यसस्य पापवस्यसस्य नयन्ति पूर्वम् पूर्वम् नयन्ति पापवस्यसस्य ।

(6)[P7] 5.1.2.3(6)– नयन्ति । पापवस्यसस्य । व्यावृत्त्यै ।

नयन्ति पापवस्यसस्य पापवस्यसस्य नयन्ति नयन्ति पापवस्यसस्य व्यावृत्त्यै व्यावृत्त्यै पापवस्यसस्य नयन्ति नयन्ति पापवस्यसस्य व्यावृत्त्यै ।

(7)[P7] 5.1.2.3(7)– पापवस्यसस्य । व्यावृत्त्यै । तस्मात् ।

पापवस्यसस्य व्यावृत्त्यै व्यावृत्त्यै पापवस्यसस्य पापवस्यसस्य व्यावृत्त्यै तस्मात् तस्माद् व्यावृत्त्यै पापवस्यसस्य पापवस्यसस्य व्यावृत्त्यै तस्मात् ।

(8)[P7] 5.1.2.3(7)– पापवस्यसस्य ।

पापवस्यसस्येति पाप – वस्यसस्य ।

(9)[P7] 5.1.2.3(8)– व्यावृत्त्यै । तस्मात् । श्रेया(ग्म्)सम् ।

व्यावृत्त्यै तस्मात् तस्माद् व्यावृत्त्यै व्यावृत्त्यै तस्मा च्छ्रेया(ग्म्)स(ग्ग्) श्रेया(ग्म्)सम् तस्माद् व्यावृत्त्यै व्यावृत्त्यै तस्मा च्छ्रेया(ग्म्)सम् ।

(10)[P7] 5.1.2.3(8)– व्यावृत्त्यै ।

व्यावृत्त्या इति वि – आवृत्त्यै ।

(11)[P7] 5.1.2.3(9)– तस्मात् । श्रेया(ग्म्)सम् । पापीयान् ।

तस्मा च्छ्रेया(ग्म्)स(ग्ग्) श्रेया(ग्म्)सम् तस्मात् तस्मा च्छ्रेया(ग्म्)सम् पापीयान् पापीयाञ् छ्रेया(ग्म्)सम् तस्मात् तस्मा च्छ्रेया(ग्म्)सम् पापीयान् ।

(12)[P7] 5.1.2.3(10)– श्रेया(ग्म्)सम् । पापीयान् । पश्चात् ।

श्रेया(ग्म्)सम् पापीयान् पापीयाञ् छ्रेया(ग्म्)स(ग्ग्) श्रेया(ग्म्)सम् पापीयान् पश्चात् पश्चात् पापीयाञ् छ्रेया(ग्म्)स(ग्ग्) श्रेया(ग्म्)सम् पापीयान् पश्चात् ।

(13)[P7] 5.1.2.3(11)– पापीयान् । पश्चात् । अनु ।

पापीयान् पश्चात् पश्चात् पापीयान् पापीयान् पश्चादन्वनु पश्चात् पापीयान् पापीयान् पश्चादनु ।

(14)[P7] 5.1.2.3(12)– पश्चात् । अनु । एति ।

पश्चा दन्वनु पश्चात् पश्चा दन्वे त्येत्यनु पश्चात् पश्चा दन्वेति ।

(15)[P7] 5.1.2.3(13)– अनु । एति । बहुः ।

अन्वे त्येत्यन् वन् वेति बहुर् बहु रेत्यन्वन् वेति बहुः ।

(16)[P7] 5.1.2.3(14)– एति । बहुः । वै ।

एति बहुर् बहु रेत्येति बहुर् वै वै बहु रेत्येति बहुर् वै ।

(17)[P7] 5.1.2.3(15)– बहुः । वै । भवतः ।

बहुर् वै वै बहुर् बहुर् वै भवतो भवतो वै बहुर् बहुर् वै भवतः ।

(18)[P7] 5.1.2.3(16)– वै । भवतः । भ्रातृव्यः ।

वै भवतो भवतो वै वै भवतो भ्रातृव्यो भ्रातृव्यो भवतो वै वै भवतो भ्रातृव्यः ।

(19)[P7] 5.1.2.3(17)– भवतः । भ्रातृव्यः । भवति ।

भवतो भ्रातृव्यो भ्रातृव्यो भवतो भवतो भ्रातृव्यो भवति भवति भ्रातृव्यो भवतो भवतो भ्रातृव्यो भवति ।

(20)[P7] 5.1.2.3(18)– भ्रातृव्यः । भवति । इव ।

भ्रातृव्यो भवति भवति भ्रातृव्यो भ्रातृव्यो भवतीवेव भवति भ्रातृव्यो भ्रातृव्यो भवतीव ।

(21)[P7] 5.1.2.3(19)– भवति । इव । खलु ।

भवतीवेव भवति भवतीव खलु खल्विव भवति भवतीव खलु ।

(22)[P7] 5.1.2.3(20)– इव । खलु । वै ।

इव खलु खल्विवेव खलु वै वै खल्विवे व खलु वै ।

(23)[P7] 5.1.2.3(21)– खलु । वै । एषः ।

खलु वै वै खलु खलु वा एष एष वै खलु खलु वा एषः ।

(24)[P7] 5.1.2.3(22)– वै । एषः । यः ।

वा एष एष वै वा एष यो य एष वै वा एष यः ।

(25)[P7] 5.1.2.3(23)– एषः । यः । अग्निम् ।

एष यो य एष एष यो ऽग्नि मग्निं ँय एष एष यो ऽग्निम् ।

(26)[P7] 5.1.2.3(24)– यः । अग्निम् । चिनुते ।

यो ऽग्नि मग्निं ँयो यो ऽग्निम् चिनुते चिनुते ऽग्निं ँयो यो ऽग्निम् चिनुते ।

(27)[P7] 5.1.2.3(25)– अग्निम् । चिनुते । वज्री ।

अग्निम् चिनुते चिनुते ऽग्नि मग्निम् चिनुते वज्री वज्री चिनुते ऽग्नि मग्निम् चिनुते वज्री ।

(28)[P7] 5.1.2.3(26)– चिनुते । वज्री । अश्वः ।

चिनुते वज्री वज्री चिनुते चिनुते वज्र्यश्वो ऽश्वो वज्री चिनुते चिनुते वज्र्यश्वः ।

(29)[P7] 5.1.2.3(27)– वज्री । अश्वः । प्रतूर्वन्न् ।

वज्र्यश्वो ऽश्वो वज्री वज्र्यश्वः प्रतूर्वन् प्रतूर्वन् नश्वो वज्री वज्र्यश्वः प्रतूर्वन्न् ।

(30)[P7] 5.1.2.3(28)– अश्वः । प्रतूर्वन्न् । आ ।

अश्वः प्रतूर्वन् प्रतूर्वन् नश्वो ऽश्वः प्रतूर्वन् ना प्रतूर्वन् नश्वो ऽश्वः प्रतूर्वन् ना ।

(31)[P7] 5.1.2.3(29)- प्रतूर्वन्न् । आ । इहि ।

प्रतूर्वन् ना प्रतूर्वन् प्रतूर्वन् नेहीह्या प्रतूर्वन् प्रतूर्वन् नेहि ।

(32)[P7] 5.1.2.3(29)- प्रतूर्वन्न् ।

प्रतूर्वन्निति प्र - तूर्वन्न् ।

(33)[P7] 5.1.2.3(30)- आ । इहि । अवक्रामन्न् । (GS-5.1-4)

एहीह्ये ह्यवक्रामन् नवक्रामन् निह्ये ह्यवक्रामन्न् ।

(34)[P7] 5.1.2.3(31)- इहि । अवक्रामन्न् । अशस्तीः । (GS-5.1-4)

इह्यवक्रामन् नवक्रामन् निही ह्यवक्रामन् नशस्ती रशस्ती रवक्रामन् निही ह्यवक्रामन् नशस्तीः ।

(35)[P7] 5.1.2.3(32)- अवक्रामन्न् । अशस्तीः । इति । (GS-5.1-4)

अवक्रामन् नशस्ती रशस्ती रवक्रामन् नवक्रामन् नशस्ती रिती त्यशस्ती रवक्रामन् नवक्रामन् नशस्ती रिति ।

(36)[P7] 5.1.2.3(32)- अवक्रामन्न् । (GS-5.1-4)

अवक्रामन्नित्यव - क्रामन्न् ।

(37)[P7] 5.1.2.3(33)- अशस्तीः । इति । आह । (GS-5.1-4)

अशस्ती रिती त्यशस्ती रशस्ती रित्याहाहे त्यशस्ती रशस्ती रित्याह ।

(38)[P7] 5.1.2.3(34)- इति । आह । वज्रेण । (GS-5.1-4)

इत्याहाहे तीत्याह वज्रेण वज्रेणाहे तीत्याह वज्रेण ।

(39)[P7] 5.1.2.3(35)- आह । वज्रेण । एव । (GS-5.1-4)

आह वज्रेण वज्रेणाहाह वज्रेणैवैव वज्रेणाहाह वज्रेणैव ।

(40)[P7] 5.1.2.3(36)– वज्रेण । एव । पाप्मानम् ।

वज्रेणैवैव वज्रेण वज्रेणैव पाप्मानम् पाप्मान मेव वज्रेण वज्रेणैव पाप्मानम् ।

(41)[P7] 5.1.2.3(37)– एव । पाप्मानम् । भ्रातृव्यम् ।

एव पाप्मानम् पाप्मान मेवैव पाप्मानम् भ्रातृव्यम् भ्रातृव्यम् पाप्मान मेवैव पाप्मानम् भ्रातृव्यम् ।

(42)[P7] 5.1.2.3(38)– पाप्मानम् । भ्रातृव्यम् । अव ।

पाप्मानम् भ्रातृव्यम् भ्रातृव्यम् पाप्मानम् पाप्मानम् भ्रातृव्य मवाव भ्रातृव्यम् पाप्मानम् पाप्मानम् भ्रातृव्य मव ।

(43)[P7] 5.1.2.3(39)– भ्रातृव्यम् । अव । क्रामति ।

भ्रातृव्य मवाव भ्रातृव्यम् भ्रातृव्य मव क्रामति क्राम त्यव भ्रातृव्यम् भ्रातृव्य मव क्रामति ।

(44)[P7] 5.1.2.3(40)– अव । क्रामति । रुद्रस्य ।

अव क्रामति क्राम त्यवाव क्रामति रुद्रस्य रुद्रस्य क्राम त्यवाव क्रामति रुद्रस्य ।

(45)[P7] 5.1.2.3(41)– क्रामति । रुद्रस्य । गाणपत्यात् ।

क्रामति रुद्रस्य रुद्रस्य क्रामति क्रामति रुद्रस्य गाणपत्याद् गाणपत्याद् रुद्रस्य क्रामति क्रामति रुद्रस्य गाणपत्यात् ।

(46)[P7] 5.1.2.3(42)– रुद्रस्य । गाणपत्यात् । इति ।

रुद्रस्य गाणपत्याद् गाणपत्याद् रुद्रस्य रुद्रस्य गाणपत्या दितीति गाणपत्याद् रुद्रस्य रुद्रस्य गाणपत्या दिति ।

(47)[P7] 5.1.2.3(43)– गाणपत्यात् । इति । आह ।

गाणपत्या दितीति गाणपत्याद् गाणपत्या दित्याहाहेति गाणपत्याद् गाणपत्या दित्याह ।

(48)[P7] 5.1.2.3(43)– गाणपत्यात् ।

गाणपत्यादिति गाण – पत्यात् ।

(49)[P7] 5.1.2.3(44)– इति । आह । रौद्राः ।

इत्या हाहेती त्याह रौद्रा रौद्रा आहेती त्याह रौद्राः ।

(50)[P7] 5.1.2.3(45)– आह । रौद्राः । वै ।

आह रौद्रा रौद्रा आहाह रौद्रा वै वै रौद्रा आहाह रौद्रा वै ।

(51)[P7] 5.1.2.3(46)– रौद्राः । वै । पशवः ।

रौद्रा वै वै रौद्रा रौद्रा वै पशवः पशवो वै रौद्रा रौद्रा वै पशवः ।

(52)[P7] 5.1.2.3(47)– वै । पशवः । रुद्रात् ।

वै पशवः पशवो वै वै पशवो रुद्राद् रुद्रात् पशवो वै वै पशवो रुद्रात् ।

(53)[P7] 5.1.2.3(48)– पशवः । रुद्रात् । एव ।

पशवो रुद्राद् रुद्रात् पशवः पशवो रुद्रा देवैव रुद्रात् पशवः पशवो रुद्रा देव ।

(54)[P7] 5.1.2.3(49)– रुद्रात् । एव । पशून् ।

रुद्रा देवैव रुद्राद् रुद्रा देव पशून् पशू नेव रुद्राद् रुद्रा देव पशून् ।

(55)[P7] 5.1.2.3(50)– एव । पशून् । निर्याच्य ।

एव पशून् पशू नेवैव पशून् निर्याच्य निर्याच्य पशू नेवैव पशून् निर्याच्य ।

(1)[P8] 5.1.2.4(1)– पशून् । निर्याच्य । आत्मने ।

पशून् निर्याच्य निर्याच्य पशून् पशून् निर्याच्यात्मन आत्मने निर्याच्य पशून् पशून् निर्याच्यात्मने ।

(2)[P8] 5.1.2.4(2)– निर्याच्य । आत्मने । कर्म ।

निर्याच्यात्मन आत्मने निर्याच्य निर्याच्यात्मने कर्म कर्मात्मने निर्याच्य निर्याच्यात्मने कर्म ।

(3)[P8] 5.1.2.4(2)– निर्याच्य ।

निर्याच्येति निः – याच्य ।

(4)[P8] 5.1.2.4(3)– आत्मने । कर्म । कुरुते ।

आत्मने कर्म कर्मात्मन आत्मने कर्म कुरुते कुरुते कर्मात्मन आत्मने कर्म कुरुते ।

(5)[P8] 5.1.2.4(4)– कर्म । कुरुते । पूष्णा ।

कर्म कुरुते कुरुते कर्म कर्म कुरुते पूष्णा पूष्णा कुरुते कर्म कर्म कुरुते पूष्णा ।

(6)[P8] 5.1.2.4(5)– कुरुते । पूष्णा । सयुजा ।

कुरुते पूष्णा पूष्णा कुरुते कुरुते पूष्णा सयुजा सयुजा पूष्णा कुरुते कुरुते पूष्णा सयुजा ।

(7)[P8] 5.1.2.4(6)– पूष्णा । सयुजा । सह ।

पूष्णा सयुजा सयुजा पूष्णा पूष्णा सयुजा सह सह सयुजा पूष्णा पूष्णा सयुजा सह ।

(8)[P8] 5.1.2.4(7)– सयुजा । सह । इति ।

सयुजा सह सह सयुजा सयुजा सहे तीति सह सयुजा सयुजा सहेति ।

(9)[P8] 5.1.2.4(7)– सयुजा ।

सयुजेति स – युजा ।

(10)[P8] 5.1.2.4(8)– सह । इति । आह ।

सहे तीति सह सहे त्याहाहेति सह सहे त्याह ।

(11)[P8] 5.1.2.4(9)– इति । आह । पूषा ।

इत्या हाहेतीत्याह पूषा पूषा ऽऽहेतीत्याह पूषा ।

(12)[P8] 5.1.2.4(10)– आह । पूषा । वै ।

आह पूषा पूषा ऽऽहाह पूषा वै वै पूषा ऽऽहाह पूषा वै ।

(13)[P8] 5.1.2.4(11)- पूषा । वै । अद्ध्वनाम् ।

पूषा वै वै पूषा पूषा वा अद्ध्वना मद्ध्वनां ँवै पूषा पूषा वा अद्ध्वनाम् ।

(14)[P8] 5.1.2.4(12)- वै । अद्ध्वनाम् । सन्नेता ।

वा अद्ध्वना मद्ध्वनां ँवै वा अद्ध्वना(ग्म्) सन्नेता सन्नेता ऽद्ध्वनां ँवै वा अद्ध्वना(ग्म्) सन्नेता ।

(15)[P8] 5.1.2.4(13)- अद्ध्वनाम् । सन्नेता । समष्ट्यै ।

अद्ध्वना(ग्म्) सन्नेता सन्नेता ऽद्ध्वना मद्ध्वना(ग्म्) सन्नेता समष्ट्यै समष्ट्यै सन्नेता ऽद्ध्वना मद्ध्वना(ग्म्) सन्नेता समष्ट्यै ।

(16)[P8] 5.1.2.4(14)- सन्नेता । समष्ट्यै । पुरीषायतनः ।

सन्नेता समष्ट्यै समष्ट्यै सन्नेता सन्नेता समष्ट्यै पुरीषायतनः पुरीषायतनः समष्ट्यै सन्नेता सन्नेता समष्ट्यै पुरीषायतनः ।

(17)[P8] 5.1.2.4(14)- सन्नेता ।

सन्नेतेति सं - नेता ।

(18)[P8] 5.1.2.4(15)- समष्ट्यै । पुरीषायतनः । वै ।

समष्ट्यै पुरीषायतनः पुरीषायतनः समष्ट्यै समष्ट्यै पुरीषायतनो वै वै पुरीषायतनः समष्ट्यै समष्ट्यै पुरीषायतनो वै ।

(19)[P8] 5.1.2.4(15)- समष्ट्यै ।

समष्ट्या इति सं - अष्ट्यै ।

(20)[P8] 5.1.2.4(16)- पुरीषायतनः । वै । एषः ।

पुरीषायतनो वै वै पुरीषायतनः पुरीषायतनो वा एष एष वै पुरीषायतनः पुरीषायतनो वा एषः ।

(21)[P8] 5.1.2.4(16)– पुरीषायतनः ।

पुरीषायतन इति पुरीष – आयतनः ।

(22)[P8] 5.1.2.4(17)– वै । एषः । यत् ।

वा एष एष वै वा एष यद् यदेष वै वा एष यत् ।

(23)[P8] 5.1.2.4(18)– एषः । यत् । अग्निः ।

एष यद् यदेष एष यदग्नि रग्निर् यदेष एष यदग्निः ।

(24)[P8] 5.1.2.4(19)– यत् । अग्निः । अङ्गिरसः ।

यदग्नि रग्निर् यद् यदग्नि रङ्गिरसो ऽङ्गिरसो ऽग्निर् यद् यदग्नि रङ्गिरसः ।

(25)[P8] 5.1.2.4(20)– अग्निः । अङ्गिरसः । वै ।

अग्नि रङ्गिरसो ऽङ्गिरसो ऽग्नि रग्नि रङ्गिरसो वै वा अङ्गिरसो ऽग्नि रग्नि रङ्गिरसो वै ।

(26)[P8] 5.1.2.4(21)– अङ्गिरसः । वै । एतम् ।

अङ्गिरसो वै वा अङ्गिरसो ऽङ्गिरसो वा एत मेतं ँवा अङ्गिरसो ऽङ्गिरसो वा एतम् ।

(27)[P8] 5.1.2.4(22)– वै । एतम् । अग्रे ।

वा एत मेतं ँवै वा एत मग्रे ऽग्र एतं ँवै वा एत मग्रे ।

(28)[P8] 5.1.2.4(23)– एतम् । अग्रे । देवतानाम् ।

एत मग्रे ऽग्र एत मेत मग्रे देवतानाम् देवताना मग्र एत मेत मग्रे देवतानाम् ।

(29)[P8] 5.1.2.4(24)– अग्रे । देवतानाम् । सम् ।

अग्रे देवतानाम् देवताना मग्रे ऽग्रे देवताना(ग्म्) स(ग्म्) सम् देवताना मग्रे ऽग्रे देवताना(ग्म्) सम् ।

(30)[P8] 5.1.2.4(25)– दे॒वता॑नाम् । सम् । अ॒भ॒र॒न्न् ।
दे॒वता॑ना॒(ग्म्॒) स(ग्म्) सम् दे॒वता॑नाम् दे॒वता॑ना॒(ग्म्॒) स म॑भरन् नभ॒रन् थ्सम् दे॒वता॑नाम्
दे॒वता॑ना॒(ग्म्॒) स म॑भरन्न् ।

(31)[P8] 5.1.2.4(26)– सम् । अ॒भ॒र॒न्न् । पृ॒थि॒व्याः ।
स म॑भरन् नभ॒रन् थ्स(ग्म्) स म॑भरन् पृथि॒व्याः पृ॑थि॒व्या अ॑भ॒रन् थ्स(ग्म्) स म॑भरन्
पृथि॒व्याः ।

(32)[P8] 5.1.2.4(27)– अ॒भ॒र॒न्न् । पृ॒थि॒व्याः । स॒धस्था॓त् ।
अ॒भ॒र॒न् पृ॒थि॒व्याः पृ॑थि॒व्या अ॑भरन् नभरन् पृथि॒व्याः स॒धस्था॓थ् स॒धस्था॓त् पृथि॒व्या अ॑भरन्
नभरन् पृथि॒व्याः स॒धस्था॓त् ।

(33)[P8] 5.1.2.4(28)– पृ॒थि॒व्याः । स॒धस्था॓त् । अ॒ग्निम् ।
पृ॒थि॒व्याः स॒धस्था॓थ् स॒धस्था॓त् पृथि॒व्याः पृ॑थि॒व्याः स॒धस्था॑ द॒ग्नि म॒ग्नि(ग्म्) स॒धस्था॓त्
पृथि॒व्याः पृ॑थि॒व्याः स॒धस्था॑ द॒ग्निम् ।

(34)[P8] 5.1.2.4(29)– स॒धस्था॓त् । अ॒ग्निम् । पु॒री॒ष्य॓म् ।
स॒धस्था॑ द॒ग्नि म॒ग्नि(ग्म्) स॒धस्था॓थ् स॒धस्था॑ द॒ग्निम् पु॑री॒ष्य॑म् पुरी॒ष्य॑ म॒ग्नि(ग्म्) स॒धस्था॓थ्
स॒धस्था॑ द॒ग्निम् पु॑री॒ष्य॓म् ।

(35)[P8] 5.1.2.4(29)– स॒धस्था॓त् ।
स॒ध॒स्था॒दिति॑ स॒ध – स्था॒त् ।

(36)[P8] 5.1.2.4(30)– अ॒ग्निम् । पु॒री॒ष्य॓म् । अ॒ङ्गि॒र॒स्वत् ।
अ॒ग्निम् पु॑री॒ष्य॑म् पुरी॒ष्य॑ म॒ग्नि म॒ग्निम् पु॑री॒ष्य॑ मङ्गि॒रस्व द॑ङ्गि॒रस्वत् पु॑री॒ष्य॑ म॒ग्नि म॒ग्निम्
पु॑री॒ष्य॑ मङ्गि॒रस्वत् ।

(37)[P8] 5.1.2.4(31)– पुरीष्यम् । अङ्गिरस्वत् । अच्छ ।

पुरीष्य मङ्गिरस्व दङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्व दच्छाच्छा ङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्व दच्छ ।

(38)[P8] 5.1.2.4(32)– अङ्गिरस्वत् । अच्छ । इहि । (GS–5.1–5)

अङ्गिरस्व दच्छाच्छा ङ्गिरस्व दङ्गिरस्व दच्छे हीह्यच्छाङ्गिरस्व दङ्गिरस्व दच्छेहि ।

(39)[P8] 5.1.2.4(33)– अच्छ । इहि । इति । (GS–5.1–5)

अच्छेही ह्यच्छाच्छे हीतीती ह्यच्छाच्छे हीति ।

(40)[P8] 5.1.2.4(34)– इहि । इति । आह । (GS–5.1–5)

इहीतीती हीही त्याहाहेती हीहीत्याह ।

(41)[P8] 5.1.2.4(35)– इति । आह । सायतनम् । (GS–5.1–5)

इत्याहाहेती त्याह सायतन(ग्म्) सायतन माहेती त्याह सायतनम् ।

(42)[P8] 5.1.2.4(36)– आह । सायतनम् । एव । (GS–5.1–5)

आह सायतन(ग्म्) सायतन माहाह सायतन मेवैव सायतन माहाह सायतन मेव ।

(43)[P8] 5.1.2.4(37)– सायतनम् । एव । एनम् । (GS–5.1–5)

सायतन मेवैव सायतन(ग्म्) सायतन मेवैन मेन मेव सायतन(ग्म्) सायतन मेवैनम् ।

(44)[P8] 5.1.2.4(37)– सायतनम् । (GS–5.1–5)

सायतनमिति स – आयतनम् ।

(45)[P8] 5.1.2.4(38)– एव । एनम् । देवताभिः । (GS–5.1–5)

एवैन मेन मेवैवैनम् देवताभिर् देवताभि रेन मेवैवैनम् देवताभिः ।

(46)[P8] 5.1.2.4(39)- एनम् । देवताभिः । सम् । (GS-5.1-5)

एनम् देवताभिर् देवताभि रेन मेनम् देवताभिः स(ग्म्) सम् देवताभि रेन मेनम् देवताभिः सम् ।

(47)[P8] 5.1.2.4(40)- देवताभिः । सम् । भरति । (GS-5.1-5)

देवताभिः स(ग्म्) सम् देवताभिर् देवताभिः सम् भरति भरति सम् देवताभिर् देवताभिः सम् भरति ।

(48)[P8] 5.1.2.4(41)- सम् । भरति । अग्निम् ।

सम् भरति भरति स(ग्म्) सम् भर त्यग्नि मग्निम् भरति स(ग्म्) सम् भर त्यग्निम् ।

(49)[P8] 5.1.2.4(42)- भरति । अग्निम् । पुरीष्यम् ।

भर त्यग्नि मग्निम् भरति भर त्यग्निम् पुरीष्यम् पुरीष्य मग्निम् भरति भर त्यग्निम् पुरीष्यम् ।

(50)[P8] 5.1.2.4(43)- अग्निम् । पुरीष्यम् । अङ्गिरस्वत् ।

अग्निम् पुरीष्यम् पुरीष्य मग्नि मग्निम् पुरीष्य मङ्गिरस्व दङ्गिरस्वत् पुरीष्य मग्नि मग्निम् पुरीष्य मङ्गिरस्वत् ।

(51)[P8] 5.1.2.4(44)- पुरीष्यम् । अङ्गिरस्वत् । अच्छ ।

पुरीष्य मङ्गिरस्व दङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्व दच्छाच्छा ङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्व दच्छ ।

(52)[P8] 5.1.2.4(45)- अङ्गिरस्वत् । अच्छ । इमः । (JD-35,GS-5.1-6)

अङ्गिरस्व दच्छाच्छा ङ्गिरस्व दङ्गिरस्व दच्छेम इमो अच्छाङ्गिरस्व दङ्गिरस्व दच्छेमः ।

(53)[P8] 5.1.2.4(46)- अच्छ । इमः । इति । (JD-35,GS-5.1-6)

अच्छेम इमो अच्छाच्छेम इतीतीमो अच्छाच्छेम इति ।

(54)[P8] 5.1.2.4(47)– इमः । इति । आह । (GS–5.1–6)

इम इतीतीम इम इत्याहाहे तीम इम इत्याह ।

(55)[P8] 5.1.2.4(48)– इति । आह । येन । (GS–5.1–6)

इत्या हाहेती त्याह येन येनाहेती त्याह येन ।

(56)[P8] 5.1.2.4(49)– आह । येन । सङ्गच्छते । (GS–5.1–6)

आह येन येनाहाह येन सङ्गच्छते सङ्गच्छते येनाहाह येन सङ्गच्छते ।

(57)[P8] 5.1.2.4(50)– येन । सङ्गच्छते । वाजम् ।

येन सङ्गच्छते सङ्गच्छते येन येन सङ्गच्छते वाजं ँवाज(ग्म्) सङ्गच्छते येन येन सङ्गच्छते वाजम् ।

(1)[P9] 5.1.2.5(1)– सङ्गच्छते । वाजम् । एव ।

सङ्गच्छते वाजं ँवाज(ग्म्) सङ्गच्छते सङ्गच्छते वाज मेवैव वाज(ग्म्) सङ्गच्छते सङ्गच्छते वाज मेव ।

(2)[P9] 5.1.2.5(1)– सङ्गच्छते ।

सङ्गच्छत इति सं – गच्छते ।

(3)[P9] 5.1.2.5(2)– वाजम् । एव । अस्य ।

वाज मेवैव वाजं ँवाज मेवास्या स्यैव वाजं ँवाज मेवास्य ।

(4)[P9] 5.1.2.5(3)– एव । अस्य । वृङ्क्ते ।

एवास्या स्यैवै वास्य वृङ्क्ते वृङ्क्ते ऽस्यैवै वास्य वृङ्क्ते ।

(5)[P9] 5.1.2.5(4)– अस्य । वृङ्क्ते । प्रजापतये ।

अस्य वृङ्क्ते वृङ्क्ते ऽस्यास्य वृङ्क्ते प्रजापतये प्रजापतये वृङ्क्ते ऽस्यास्य वृङ्क्ते प्रजापतये ।

(6)[P9] 5.1.2.5(5)- वृङ्क्ते । प्रजापतये । प्रतिप्रोच्य ।

वृङ्क्ते प्रजापतये प्रजापतये वृङ्क्ते वृङ्क्ते प्रजापतये प्रतिप्रोच्य प्रतिप्रोच्य प्रजापतये वृङ्क्ते वृङ्क्ते प्रजापतये प्रतिप्रोच्य ।

(7)[P9] 5.1.2.5(6)- प्रजापतये । प्रतिप्रोच्य । अग्निः ।

प्रजापतये प्रतिप्रोच्य प्रतिप्रोच्य प्रजापतये प्रजापतये प्रतिप्रोच्या ग्नि रग्निः प्रतिप्रोच्य प्रजापतये प्रजापतये प्रतिप्रोच्याग्निः ।

(8)[P9] 5.1.2.5(6)- प्रजापतये ।

प्रजापतय इति प्रजा - पतये ।

(9)[P9] 5.1.2.5(7)- प्रतिप्रोच्य । अग्निः । संभृत्यः ।

प्रतिप्रोच्या ग्नि रग्निः प्रतिप्रोच्य प्रतिप्रोच्याग्निः संभृत्यः संभृत्यो ऽग्निः प्रतिप्रोच्य प्रतिप्रोच्याग्निः संभृत्यः ।

(10)[P9] 5.1.2.5(7)- प्रतिप्रोच्य ।

प्रतिप्रोच्येति प्रति - प्रोच्य ।

(11)[P9] 5.1.2.5(8)- अग्निः । संभृत्यः । इति ।

अग्निः संभृत्यः संभृत्यो ऽग्नि रग्निः संभृत्य इतीति संभृत्यो ऽग्नि रग्निः संभृत्य इति ।

(12)[P9] 5.1.2.5(9)- संभृत्यः । इति । आहुः ।

संभृत्य इतीति संभृत्यः संभृत्य इत्याहु राहु रिति संभृत्यः संभृत्य इत्याहुः ।

(13)[P9] 5.1.2.5(9)- संभृत्यः ।

संभृत्य इति सं - भृत्यः ।

(14)[P9] 5.1.2.5(10)- इति । आहुः । इयम् ।

इत्याहु राहु रिती त्याहु रिय मिय माहु रिती त्याहु रियम् ।

(15)[P9] 5.1.2.5(11)– आहुः । इयम् । वै ।

आहुरिय मियं माहु राहु रियं ँवै वा इय माहु राहु रियं ँवै ।

(16)[P9] 5.1.2.5(12)– इयम् । वै । प्रजापतिः ।

इयं ँवै वा इय मियं ँवै प्रजापतिः प्रजापतिर् वा इय मियं ँवै प्रजापतिः ।

(17)[P9] 5.1.2.5(13)– वै । प्रजापतिः । तस्याः ।

वै प्रजापतिः प्रजापतिर् वै वै प्रजापति स्तस्या स्तस्याः प्रजापतिर् वै वै प्रजापति स्तस्याः ।

(18)[P9] 5.1.2.5(14)– प्रजापतिः । तस्याः । एतत् ।

प्रजापति स्तस्या स्तस्याः प्रजापतिः प्रजापति स्तस्या एत देतत् तस्याः प्रजापतिः प्रजापति स्तस्या एतत् ।

(19)[P9] 5.1.2.5(14)– प्रजापतिः ।

प्रजापतिरिति प्रजा – पतिः ।

(20)[P9] 5.1.2.5(15)– तस्याः । एतत् । श्रोत्रम् ।

तस्या एत देतत् तस्या स्तस्या एत च्छ्रोत्र(गग्) श्रोत्र मेतत् तस्या स्तस्या एत च्छ्रोत्रम् ।

(21)[P9] 5.1.2.5(16)– एतत् । श्रोत्रम् । यत् ।

एत च्छ्रोत्र(गग्) श्रोत्र मेत देत च्छ्रोत्रं ँयद् यच्छ्रोत्र मेत देत च्छ्रोत्रं ँयत् ।

(22)[P9] 5.1.2.5(17)– श्रोत्रम् । यत् । वल्मीकः ।

श्रोत्रं ँयद् यच्छ्रोत्र(गग्) श्रोत्रं ँयद् वल्मीको वल्मीको यच्छ्रोत्र(गग्) श्रोत्रं ँयद् वल्मीकः ।

(23)[P9] 5.1.2.5(18)– यत् । वल्मीकः । अग्निम् ।

यद् वल्मीको वल्मीको यद् यद् वल्मीको ऽग्नि मग्निं ँवल्मीको यद् यद् वल्मीको ऽग्निम् ।

(24)[P9] 5.1.2.5(19)- वल्मीकः । अग्निम् । पुरीष्यम् ।

वल्मीको ऽग्नि मग्निं वँल्मीको वल्मीको ऽग्निम् पुरीष्यम् पुरीष्य मग्निं वँल्मीको वल्मीको ऽग्निम् पुरीष्यम् ।

(25)[P9] 5.1.2.5(20)- अग्निम् । पुरीष्यम् । अङ्गिरस्वत् ।

अग्निम् पुरीष्यम् पुरीष्य मग्नि मग्निम् पुरीष्य मङ्गिरस्व दङ्गिरस्वत् पुरीष्य मग्नि मग्निम् पुरीष्य मङ्गिरस्वत् ।

(26)[P9] 5.1.2.5(21)- पुरीष्यम् । अङ्गिरस्वत् । भरिष्यामः ।

पुरीष्य मङ्गिरस्व दङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्वद् भरिष्यामो भरिष्यामो ऽङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्वद् भरिष्यामः ।

(27)[P9] 5.1.2.5(22)- अङ्गिरस्वत् । भरिष्यामः । इति । (PS-12.7,GS-5.1-7)

अङ्गिरस्वद् भरिष्यामो भरिष्यामो ऽङ्गिरस्व दङ्गिरस्वद् भरिष्याम इतीति भरिष्यामो ऽङ्गिरस्व दङ्गिरस्वद् भरिष्याम इति ।

(28)[P9] 5.1.2.5(23)- भरिष्यामः । इति । वल्मीकवपाम् । (GS-5.1-7)

भरिष्याम इतीति भरिष्यामो भरिष्याम इति वल्मीकवपां वँल्मीकवपा मिति भरिष्यामो भरिष्याम इति वल्मीकवपाम् ।

(29)[P9] 5.1.2.5(24)- इति । वल्मीकवपाम् । उप । (GS-5.1-7)

इति वल्मीकवपां वँल्मीकवपा मितीति वल्मीकवपा मुपोप वल्मीकवपा मितीति वल्मीकवपा मुप ।

(30)[P9] 5.1.2.5(25)- वल्मीकवपाम् । उप । तिष्ठते ।

वल्मीकवपा मुपोप वल्मीकवपां वँल्मीकवपा मुप तिष्ठते तिष्ठत उप वल्मीकवपां वँल्मीकवपा मुप तिष्ठते ।

(31)[P9] 5.1.2.5(25)– वल्मीकवपाम् ।

वल्मीकवपामिति वल्मीक – वपाम् ।

(32)[P9] 5.1.2.5(26)– उप । तिष्ठते । साक्षात् ।

उप तिष्ठते तिष्ठत उपोप तिष्ठते साक्षाथ् साक्षात् तिष्ठत उपोप तिष्ठते साक्षात् ।

(33)[P9] 5.1.2.5(27)– तिष्ठते । साक्षात् । एव ।

तिष्ठते साक्षाथ् साक्षात् तिष्ठते तिष्ठते साक्षा देवैव साक्षात् तिष्ठते तिष्ठते साक्षा देव ।

(34)[P9] 5.1.2.5(28)– साक्षात् । एव । प्रजापतये ।

साक्षा देवैव साक्षाथ् साक्षा देव प्रजापतये प्रजापतय एव साक्षाथ् साक्षा देव प्रजापतये ।

(35)[P9] 5.1.2.5(28)– साक्षात् ।

साक्षादिति स – अक्षात् ।

(36)[P9] 5.1.2.5(29)– एव । प्रजापतये । प्रतिप्रोच्य ।

एव प्रजापतये प्रजापतय एवैव प्रजापतये प्रतिप्रोच्य प्रतिप्रोच्य प्रजापतय एवैव प्रजापतये प्रतिप्रोच्य ।

(37)[P9] 5.1.2.5(30)– प्रजापतये । प्रतिप्रोच्य । अग्निम् ।

प्रजापतये प्रतिप्रोच्य प्रतिप्रोच्य प्रजापतये प्रजापतये प्रतिप्रोच्याग्नि मग्निम् प्रतिप्रोच्य प्रजापतये प्रजापतये प्रतिप्रोच्याग्निम् ।

(38)[P9] 5.1.2.5(30)– प्रजापतये ।

प्रजापतय इति प्रजा – पतये ।

(39)[P9] 5.1.2.5(31)– प्रतिप्रोच्य । अग्निम् । सम् ।

प्रतिप्रोच्याग्नि मग्निम् प्रतिप्रोच्य प्रतिप्रोच्याग्नि(ग्म्) स(ग्म्) स मग्निम् प्रतिप्रोच्य प्रतिप्रोच्याग्नि(ग्म्) सम् ।

(40)[P9] 5.1.2.5(31)- प्रतिप्रोच्य ।

प्रतिप्रोच्येति प्रति - प्रोच्य ।

(41)[P9] 5.1.2.5(32)- अग्निम् । सम् । भरति ।

अग्नि(ग्म्) स(ग्म्) स मग्नि मग्नि(ग्म्) सम् भरति भरति स मग्नि मग्नि(ग्म्) सम् भरति ।

(42)[P9] 5.1.2.5(33)- सम् । भरति । अग्निम् ।

सम् भरति भरति स(ग्म्) सम् भरत्यग्नि मग्निम् भरति स(ग्म्) सम् भर त्यग्निम् ।

(43)[P9] 5.1.2.5(34)- भरति । अग्निम् । पुरीष्यम् ।

भरत्यग्नि मग्निम् भरति भर त्यग्निम् पुरीष्यम् पुरीष्य मग्निम् भरति भर त्यग्निम् पुरीष्यम् ।

(44)[P9] 5.1.2.5(35)- अग्निम् । पुरीष्यम् । अङ्गिरस्वत् ।

अग्निम् पुरीष्यम् पुरीष्य मग्नि मग्निम् पुरीष्य मङ्गिरस्व दङ्गिरस्वत् पुरीष्य मग्नि मग्निम् पुरीष्य मङ्गिरस्वत् ।

(45)[P9] 5.1.2.5(36)- पुरीष्यम् । अङ्गिरस्वत् । भरामः ।

पुरीष्य मङ्गिरस्व दङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्वद् भरामो भरामो ऽङ्गिरस्वत् पुरीष्यम् पुरीष्य मङ्गिरस्वद् भरामः ।

(46)[P9] 5.1.2.5(37)- अङ्गिरस्वत् । भरामः । इति । (PS-12.7,GS-5.1-8)

अङ्गिरस्वद् भरामो भरामो ऽङ्गिरस्व दङ्गिरस्वद् भराम इतीति भरामो ऽङ्गिरस्व दङ्गिरस्वद् भराम इति ।

(47)[P9] 5.1.2.5(38)- भरामः । इति । आह । (GS-5.1-8)

भराम इतीति भरामो भराम इत्याहाहेति भरामो भराम इत्याह ।

(48)[P9] 5.1.2.5(39)- इति । आह । येन । (GS-5.1-8)

इत्याहाहेती त्याह येन येनाहेती त्याह येन ।

(49)[P9] 5.1.2.5(40)– आह । येन । सङ्गच्छते । (GS–5.1–8)

आह येन येनाहाह येन सङ्गच्छते सङ्गच्छते येनाहाह येन सङ्गच्छते ।

(50)[P9] 5.1.2.5(41)– येन । सङ्गच्छते । वाजम् ।

येन सङ्गच्छते सङ्गच्छते येन येन सङ्गच्छते वाजं ँवाज(ग्म्) सङ्गच्छते येन येन सङ्गच्छते वाजम् ।

(51)[P9] 5.1.2.5(42)– सङ्गच्छते । वाजम् । एव ।

सङ्गच्छते वाजं ँवाज(ग्म्) सङ्गच्छते सङ्गच्छते वाज मेवैव वाज(ग्म्) सङ्गच्छते सङ्गच्छते वाज मेव ।

(52)[P9] 5.1.2.5(42)– सङ्गच्छते ।

सङ्गच्छत इति सं – गच्छते ।

(53)[P9] 5.1.2.5(43)– वाजम् । एव । अस्य ।

वाज मेवैव वाजं ँवाज मेवास्या स्यैव वाजं ँवाज मेवास्य ।

(54)[P9] 5.1.2.5(44)– एव । अस्य । वृङ्क्ते ।

एवास्या स्यैवैवास्य वृङ्क्ते वृङ्क्ते ऽस्यैवैवास्य वृङ्क्ते ।

(55)[P9] 5.1.2.5(45)– अस्य । वृङ्क्ते । अनु ।

अस्य वृङ्क्ते वृङ्क्ते ऽस्यास्य वृङ्क्ते ऽन्वनु वृङ्क्ते ऽस्यास्य वृङ्क्ते ऽनु ।

(56)[P9] 5.1.2.5(46)– वृङ्क्ते । अनु । अग्निः ।

वृङ्क्ते ऽन्वनु वृङ्क्ते वृङ्क्ते ऽन्वग्नि रग्नि रनु वृङ्क्ते वृङ्क्ते ऽन्वग्निः ।

(57)[P9] 5.1.2.5(47)– अनु । अग्निः । उषसाम् ।

अन्वग्नि रग्नि रन्वन् वग्नि रुषसा मुषसा मग्नि रन्वन् वग्नि रुषसाम् ।

(58)[P9] 5.1.2.5(48)- अग्निः । उषसाम् । अग्रम् ।

अग्नि रुषसा मुषसा मग्नि रग्नि रुषसा मग्र मग्र मुषसा मग्नि रग्नि रुषसा मग्रम् ।

(59)[P9] 5.1.2.5(49)- उषसाम् । अग्रम् । अख्यत् ।

उषसा मग्र मग्र मुषसा मुषसा मग्र मख्य दख्य दग्र मुषसा मुषसा मग्र मख्यत् ।

(60)[P9] 5.1.2.5(50)- अग्रम् । अख्यत् । इति ।

अग्र मख्य दख्य दग्र मग्र मख्य दिती त्यख्य दग्र मग्र मख्य दिति ।

(1)[P10] 5.1.2.6(1)- अख्यत् । इति । आह ।

अख्यदिती त्यख्य दख्य दित्याहाहे त्यख्य दख्य दित्याह ।

(2)[P10] 5.1.2.6(2)- इति । आह । अनुख्यात्यै ।

इत्याहाहेती त्याहानुख्यात्या अनुख्यात्या आहेती त्याहानुख्यात्यै ।

(3)[P10] 5.1.2.6(3)- आह । अनुख्यात्यै । आगत्य ।

आहानुख्यात्या अनुख्यात्या आहाहानुख्यात्या आगत्या गत्या नुख्यात्या आहाहानुख्यात्या आगत्य ।

(4)[P10] 5.1.2.6(4)- अनुख्यात्यै । आगत्य । वाजी ।

अनुख्यात्या आगत्या गत्या नुख्यात्या अनुख्यात्या आगत्य वाजी वाज्यागत्या नुख्यात्या अनुख्यात्या आगत्य वाजी ।

(5)[P10] 5.1.2.6(4)- अनुख्यात्यै ।

अनुख्यात्या इत्यनु - ख्यात्यै ।

(6)[P10] 5.1.2.6(5)- आगत्य । वाजी । अद्ध्वनः । (GS-5.1-9)

आगत्य वाजी वाज्यागत्या गत्य वाज्यद्ध्वनो अद्ध्वनो वाज्यागत्या गत्य वाज्यद्ध्वनः ।

(7)[P10] 5.1.2.6(5)– आगत्य । (GS–5.1–9)

आगत्येत्या – गत्य ।

(8)[P10] 5.1.2.6(6)– वाजी । अद्ध्वनः । आक्रम्य । (JM–74,JD–35,GD–33,GS–5.1–9)

वाज्यद्ध्वनो अद्ध्वनो वाजी वाज्यद्ध्वन आक्रम्या क्रम्या द्ध्वनो वाजी वाज्यद्ध्वन आक्रम्य ।

(9)[P10] 5.1.2.6(7)– अद्ध्वनः । आक्रम्य । वाजिन्न् । (JM–74,JD–36,GD–33,GS–5.1–9)

अद्ध्वन आक्रम्या क्रम्या द्ध्वनो ऽद्ध्वन आक्रम्य वाजिन्. वाजिन् नाक्रम्या द्ध्वनो ऽद्ध्वन आक्रम्य वाजिन्न् ।

(10)[P10] 5.1.2.6(8)– आक्रम्य । वाजिन्न् । पृथिवीम् । (JD–36,GD–33,GS–5.1–9)

आक्रम्य वाजिन्. वाजिन् नाक्रम्या क्रम्य वाजिन् पृथिवीम् पृथिवीँ वाजिन् नाक्रम्या क्रम्य वाजिन् पृथिवीम् ।

(11)[P10] 5.1.2.6(8)– आक्रम्य । (JD–36,GD–33,GS–5.1–9)

आक्रम्येत्या – क्रम्य ।

(12)[P10] 5.1.2.6(9)– वाजिन्न् । पृथिवीम् । इति । (GS–5.1–9)

वाजिन् पृथिवीम् पृथिवीँ वाजिन्. वाजिन् पृथिवी मितीति पृथिवीँ वाजिन्. वाजिन् पृथिवी मिति ।

(13)[P10] 5.1.2.6(10)– पृथिवीम् । इति । आह ।

पृथिवी मितीति पृथिवीम् पृथिवी मित्याहाहेति पृथिवीम् पृथिवी मित्याह ।

(14)[P10] 5.1.2.6(11)– इति । आह । इच्छति ।

इत्याहाहेती त्याहेच्छतीच्छ त्याहेती त्याहेच्छति ।

(15)[P10] 5.1.2.6(12)- आह । इच्छति । एव ।

आहे च्छतीच्छ त्याहाहेच्छ त्येवैवेच्छ त्याहाहेच्छ त्येव ।

(16)[P10] 5.1.2.6(13)- इच्छति । एव । एनम् ।

इच्छ त्येवैवे च्छतीच्छ त्येवैन मेन मेवे च्छती च्छ त्येवैनम् ।

(17)[P10] 5.1.2.6(14)- एव । एनम् । पूर्वया ।

एवैन मेन मेवै वैनम् पूर्वया पूर्वयैन मेवै वैनम् पूर्वया ।

(18)[P10] 5.1.2.6(15)- एनम् । पूर्वया । विन्दति ।

एनम् पूर्वया पूर्वयैन मेनम् पूर्वया विन्दति विन्दति पूर्वयैन मेनम् पूर्वया विन्दति ।

(19)[P10] 5.1.2.6(16)- पूर्वया । विन्दति । उत्तरया ।

पूर्वया विन्दति विन्दति पूर्वया पूर्वया विन्द त्युत्तर योत्तरया विन्दति पूर्वया पूर्वया विन्दत्युत्तरया ।

(20)[P10] 5.1.2.6(17)- विन्दति । उत्तरया । द्वाभ्याम् ।

विन्द त्युत्तर योत्तरया विन्दति विन्द त्युत्तरया द्वाभ्याम् द्वाभ्या मुत्तरया विन्दति विन्द त्युत्तरया द्वाभ्याम् ।

(21)[P10] 5.1.2.6(18)- उत्तरया । द्वाभ्याम् । आ ।

उत्तरया द्वाभ्याम् द्वाभ्या मुत्तर योत्तरया द्वाभ्या मा द्वाभ्या मुत्तर योत्तरया द्वाभ्या मा ।

(22)[P10] 5.1.2.6(18)- उत्तरया ।

उत्तरयेत्युत् - तरया ।

(23)[P10] 5.1.2.6(19)- द्वाभ्याम् । आ । क्रमयति ।

द्वाभ्या मा द्वाभ्याम् द्वाभ्या मा क्रमयति क्रमयत्या द्वाभ्याम् द्वाभ्या मा क्रमयति ।

(24)[P10] 5.1.2.6(20)– आ । क्रमयति । प्रतिष्ठित्यै ।

आ क्रमयति क्रमयत्या क्रमयति प्रतिष्ठित्यै प्रतिष्ठित्यै क्रमयत्या क्रमयति प्रतिष्ठित्यै ।

(25)[P10] 5.1.2.6(21)– क्रमयति । प्रतिष्ठित्यै । अनुरूपाभ्याम् ।

क्रमयति प्रतिष्ठित्यै प्रतिष्ठित्यै क्रमयति क्रमयति प्रतिष्ठित्या अनुरूपाभ्या मनुरूपाभ्याम् प्रतिष्ठित्यै क्रमयति क्रमयति प्रतिष्ठित्या अनुरूपाभ्याम् ।

(26)[P10] 5.1.2.6(22)– प्रतिष्ठित्यै । अनुरूपाभ्याम् । तस्मात् ।

प्रतिष्ठित्या अनुरूपाभ्या मनुरूपाभ्याम् प्रतिष्ठित्यै प्रतिष्ठित्या अनुरूपाभ्याम् तस्मात् तस्मा दनुरूपाभ्याम् प्रतिष्ठित्यै प्रतिष्ठित्या अनुरूपाभ्याम् तस्मात् ।

(27)[P10] 5.1.2.6(22)– प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति – स्थित्यै ।

(28)[P10] 5.1.2.6(23)– अनुरूपाभ्याम् । तस्मात् । अनुरूपाः ।

अनुरूपाभ्याम् तस्मात् तस्मा दनुरूपाभ्या मनुरूपाभ्याम् तस्मा दनुरूपा अनुरूपा स्तस्मा दनुरूपाभ्या मनुरूपाभ्याम् तस्मा दनुरूपाः ।

(29)[P10] 5.1.2.6(23)– अनुरूपाभ्याम् ।

अनुरूपाभ्यामित्यनु – रूपाभ्याम् ।

(30)[P10] 5.1.2.6(24)– तस्मात् । अनुरूपाः । पशवः ।

तस्मा दनुरूपा अनुरूपा स्तस्मात् तस्मा दनुरूपाः पशवः पशवो ऽनुरूपा स्तस्मात् तस्मा दनुरूपाः पशवः ।

(31)[P10] 5.1.2.6(25)– अनुरूपाः । पशवः । प्र ।

अनुरूपाः पशवः पशवो ऽनुरूपा अनुरूपाः पशवः प्र प्र पशवो ऽनुरूपा अनुरूपाः पशवः प्र ।

(32)[P10] 5.1.2.6(25)– अनुरूपाः ।

अनुरूपा इत्यनु – रूपाः ।

(33)[P10] 5.1.2.6(26)– पशवः । प्र । जायन्ते ।

पशवः प्र प्र पशवः पशवः प्र जायन्ते जायन्ते प्र पशवः पशवः प्र जायन्ते ।

(34)[P10] 5.1.2.6(27)– प्र । जायन्ते । द्यौः ।

प्र जायन्ते जायन्ते प्र प्र जायन्ते द्यौर् द्यौर् जायन्ते प्र प्र जायन्ते द्यौः ।

(35)[P10] 5.1.2.6(28)– जायन्ते । द्यौः । ते ।

जायन्ते द्यौर् द्यौर् जायन्ते जायन्ते द्यौ स्ते ते द्यौर् जायन्ते जायन्ते द्यौ स्ते ।

(36)[P10] 5.1.2.6(29)– द्यौः । ते । पृष्ठम् ।

द्यौ स्ते ते द्यौर् द्यौ स्ते पृष्ठम् पृष्ठम् ते द्यौर् द्यौ स्ते पृष्ठम् ।

(37)[P10] 5.1.2.6(30)– ते । पृष्ठम् । पृथिवी ।

ते पृष्ठम् पृष्ठम् ते ते पृष्ठम् पृथिवी पृथिवी पृष्ठम् ते ते पृष्ठम् पृथिवी ।

(38)[P10] 5.1.2.6(31)– पृष्ठम् । पृथिवी । सधस्थम् ।

पृष्ठम् पृथिवी पृथिवी पृष्ठम् पृष्ठम् पृथिवी सधस्थ(ग्म्) सधस्थम् पृथिवी पृष्ठम् पृष्ठम् पृथिवी सधस्थम् ।

(39)[P10] 5.1.2.6(32)– पृथिवी । सधस्थम् । इति ।

पृथिवी सधस्थ(ग्म्) सधस्थम् पृथिवी पृथिवी सधस्थ मितीति सधस्थम् पृथिवी पृथिवी सधस्थ मिति ।

(40)[P10] 5.1.2.6(33)– सधस्थम् । इति । आह ।

सधस्थ मितीति सधस्थ(ग्म्) सधस्थ मित्या हाहेति सधस्थ(ग्म्) सधस्थ मित्याह ।

(41)[P10] 5.1.2.6(33)– स॒धस्थ᳚म् ।

स॒धस्थ॒मिति॑ स॒ध – स्थ॒म् ।

(42)[P10] 5.1.2.6(34)– इति॑ । आ॒ह॒ । ए॒भ्यः ।

इत्या॑हा॒हेती त्या॑है॒भ्य ए॒भ्य आ॒हेती त्या॑है॒भ्यः ।

(43)[P10] 5.1.2.6(35)– आ॒ह॒ । ए॒भ्यः । वै ।

आ॒है॒भ्य ए॒भ्य आ॑हाहै॒भ्यो वै वा ए॒भ्य आ॑हाहै॒भ्यो वै ।

(44)[P10] 5.1.2.6(36)– ए॒भ्यः । वै । ए॒तम् ।

ए॒भ्यो वै वा ए॒भ्य ए॒भ्यो वा ए॒त मे॒तं ँवा ए॒भ्य ए॒भ्यो वा ए॒तम् ।

(45)[P10] 5.1.2.6(37)– वै । ए॒तम् । लो॒केभ्यः॑ ।

वा ए॒त मे॒तं ँवै वा ए॒तम् ँलो॒केभ्यो॑ लो॒केभ्य॑ ए॒तं ँवै वा ए॒तम् ँलो॒केभ्यः॑ ।

(46)[P10] 5.1.2.6(38)– ए॒तम् । लो॒केभ्यः॑ । प्र॒जाप॑तिः ।

ए॒तम् ँलो॒केभ्यो॑ लो॒केभ्य॑ ए॒त मे॒तम् ँलो॒केभ्यः॑ प्र॒जाप॑तिः प्र॒जाप॑तिर् लो॒केभ्य॑ ए॒त मे॒तम् ँलो॒केभ्यः॑ प्र॒जाप॑तिः ।

(47)[P10] 5.1.2.6(39)– लो॒केभ्यः॑ । प्र॒जाप॑तिः । सम् ।

लो॒केभ्यः॑ प्र॒जाप॑तिः प्र॒जाप॑तिर् लो॒केभ्यो॑ लो॒केभ्यः॑ प्र॒जाप॑ति॒ः स(ग्म्) सम् प्र॒जाप॑तिर् लो॒केभ्यो॑ लो॒केभ्यः॑ प्र॒जाप॑ति॒ः सम् ।

(48)[P10] 5.1.2.6(40)– प्र॒जाप॑तिः । सम् । ऐ॒र॒य॒त् ।

प्र॒जाप॑ति॒ः स(ग्म्) सम् प्र॒जाप॑तिः प्र॒जाप॑ति॒ः स मै॑रय दैरय॒थ् सम् प्र॒जाप॑तिः प्र॒जाप॑ति॒ः स मै॑रयत् ।

(49)[P10] 5.1.2.6(40)– प्र॒जाप॑तिः ।

प्र॒जाप॑ति॒रिति॑ प्र॒जा – प॒ति॒ः ।

(50)[P10] 5.1.2.6(41)– सम् । ऐरयत् । रूपम् ।

स मैरय दैरयथ् स(ग्म्) स मैरयद् रूप(ग्म्) रूप मैरयथ् स(ग्म्) स मैरयद् रूपम् ।

(51)[P10] 5.1.2.6(42)– ऐरयत् । रूपम् । एव ।

ऐरयद् रूप(ग्म्) रूप मैरय दैरयद् रूप मेवैव रूप मैरय दैरयद् रूप मेव ।

(52)[P10] 5.1.2.6(43)– रूपम् । एव । अस्य ।

रूप मेवैव रूप(ग्म्) रूप मेवास्या स्यैव रूप(ग्म्) रूप मेवास्य ।

(53)[P10] 5.1.2.6(44)– एव । अस्य । एतत् ।

एवास्या स्यैवैवा स्यैत देत दस्यैवैवा स्यैतत् ।

(54)[P10] 5.1.2.6(45)– अस्य । एतत् । महिमानम् ।

अस्यैत देत दस्या स्यैतन् महिमानम् महिमान मेत दस्या स्यैतन् महिमानम् ।

(55)[P10] 5.1.2.6(46)– एतत् । महिमानम् । व्याचष्टे ।

एतन् महिमानम् महिमान मेत देतन् महिमानं ँव्याचष्टे व्याचष्टे महिमान मेत देतन् महिमानं ँव्याचष्टे ।

(56)[P10] 5.1.2.6(47)– महिमानम् । व्याचष्टे । वज्री ।

महिमानं ँव्याचष्टे व्याचष्टे महिमानम् महिमानं ँव्याचष्टे वज्री वज्री व्याचष्टे महिमानम् महिमानं ँव्याचष्टे वज्री ।

(57)[P10] 5.1.2.6(48)– व्याचष्टे । वज्री । वै ।

व्याचष्टे वज्री वज्री व्याचष्टे व्याचष्टे वज्री वै वै वज्री व्याचष्टे व्याचष्टे वज्री वै ।

(58)[P10] 5.1.2.6(48)– व्याचष्टे ।

व्याचष्ट इति वि – आचष्टे ।

(59)[P10] 5.1.2.6(49)– वज्री । वै । एषः ।

वज्री वै वै वज्री वज्री वा एष एष वै वज्री वज्री वा एषः ।

(60)[P10] 5.1.2.6(50)– वै । एषः । यत् ।

वा एष एष वै वा एष यद् यदेष वै वा एष यत् ।

(61)[P10] 5.1.2.6(51)– एषः । यत् । अश्वः ।

एष यद् यदेष एष यदश्वो ऽश्वो यदेष एष यदश्वः ।

(62)[P10] 5.1.2.6(52)– यत् । अश्वः । दद्भिः ।

यदश्वो ऽश्वो यद् यदश्वो दद्भिर् दद्भि रश्वो यद् यदश्वो दद्भिः ।

(63)[P10] 5.1.2.6(53)– अश्वः । दद्भिः । अन्यतोदद्भ्यः ।

अश्वो दद्भिर् दद्भि रश्वो ऽश्वो दद्भि रन्यतो दद्भ्यो ऽन्यतो दद्भ्यो दद्भि रश्वो ऽश्वो दद्भि रन्यतो दद्भ्यः ।

(64)[P10] 5.1.2.6(54)– दद्भिः । अन्यतोदद्भ्यः । भूयान् ।

दद्भि रन्यतो दद्भ्यो ऽन्यतो दद्भ्यो दद्भिर् दद्भि रन्यतो दद्भ्यो भूयान् भूया नन्यतो दद्भ्यो दद्भिर् दद्भि रन्यतो दद्भ्यो भूयान् ।

(65)[P10] 5.1.2.6(54)– दद्भिः ।

दद्भिरिति दत् – भिः ।

(66)[P10] 5.1.2.6(55)– अन्यतोदद्भ्यः । भूयान् । लोमभिः ।

अन्यतोदद्भ्यो भूयान् भूया नन्यतोदद्भ्यो ऽन्यतोदद्भ्यो भूयान् ँल्लोमभिर् लोमभिर् भूया नन्यतोदद्भ्यो ऽन्यतोदद्भ्यो भूयान् ँल्लोमभिः ।

(67)[P10] 5.1.2.6(55)– अन्यतोदद्भ्यः ।

अन्यतोदद्भ्य इत्यन्यतोदत् – भ्यः ।

(68)[P10] 5.1.2.6(56)– भूयान् । लोमभिः । उभयादद्भ्यः ।

भूयान् ँल्लोमभिर् लोमभिर् भूयान् भूयान् ँल्लोमभि रुभयादद्भ्य उभयादद्भ्यो लोमभिर् भूयान् भूयान् ँल्लोमभि रुभयादद्भ्यः ।

(69)[P10] 5.1.2.6(57)– लोमभिः । उभयादद्भ्यः । यम् ।

लोमभि रुभयादद्भ्य उभयादद्भ्यो लोमभिर् लोमभि रुभयादद्भ्यो यं ँय मुभयादद्भ्यो लोमभिर् लोमभि रुभयादद्भ्यो यम् ।

(70)[P10] 5.1.2.6(57)– लोमभिः ।

लोमभिरिति लोम – भिः ।

(71)[P10] 5.1.2.6(58)– उभयादद्भ्यः । यम् । द्विष्यात् ।

उभयादद्भ्यो यं ँय मुभयादद्भ्य उभयादद्भ्यो यम् द्विष्याद् द्विष्याद् य मुभयादद्भ्य उभयादद्भ्यो यम् द्विष्यात् ।

(72)[P10] 5.1.2.6(58)– उभयादद्भ्यः ।

उभयादद्भ्य इत्युभयादत् – भ्यः ।

(73)[P10] 5.1.2.6(59)– यम् । द्विष्यात् । तम् ।

यम् द्विष्याद् द्विष्याद् यं ँयम् द्विष्यात् तम् तम् द्विष्याद् यं ँयम् द्विष्यात् तम् ।

(74)[P10] 5.1.2.6(60)– द्विष्यात् । तम् । अधस्पदम् ।

द्विष्यात् तम् तम् द्विष्याद् द्विष्यात् त मधस्पद मधस्पदम् तम् द्विष्याद् द्विष्यात् त मधस्पदम् ।

(75)[P10] 5.1.2.6(61)– तम् । अधस्पदम् । ध्यायेत् ।

त मधस्पद मधस्पदम् तम् त मधस्पदम् ध्यायेद् ध्याये दधस्पदम् तम् त मधस्पदम् ध्यायेत् ।

(76)[P10] 5.1.2.6(62)– अधस्पदम् । ध्यायेत् । वज्रेण ।

अधस्पदम् ध्यायेद् ध्याये दधस्पद मधस्पदम् ध्यायेद् वज्रेण वज्रेण ध्याये दधस्पद मधस्पदम् ध्यायेद् वज्रेण ।

(77)[P10] 5.1.2.6(62)– अधस्पदम् ।

अधस्पदमित्यधः – पदम् ।

(78)[P10] 5.1.2.6(63)– ध्यायेत् । वज्रेण । एव ।

ध्यायेद् वज्रेण वज्रेण ध्यायेद् ध्यायेद् वज्रेणैवैव वज्रेण ध्यायेद् ध्यायेद् वज्रेणैव ।

(79)[P10] 5.1.2.6(64)– वज्रेण । एव । एनम् ।

वज्रेणैवैव वज्रेण वज्रेणैवैन मेन मेव वज्रेण वज्रेणैवैनम् ।

(80)[P10] 5.1.2.6(65)– एव । एनम् । स्तृणुते ॥

एवैन मेन मेवैवैन(गग्)ं स्तृणुते स्तृणुत एन मेवैवैन(गग्)ं स्तृणुते ।

(81)[P10] 5.1.2.6(66)– एनम् । स्तृणुते ॥

एन(गग्) स्तृणुते स्तृणुत एन मेन(गग्) स्तृणुते ।

(82)[P10] 5.1.2.6(67)– स्तृणुते ॥

स्तृणुत इति स्तणुते ।

=======

## 5.1.3 अनुवाकम् 3 – घनम्

(1)[P11] 5.1.3.1(1)– उत् । क्राम । उत् । (GS–5.1–10)

उत् क्राम क्रामो दुत् क्रामो दुत् क्रामो दुत् क्रामोत् ।

(2)[P11] 5.1.3.1(2)– क्राम । उत् । अक्रमीत् । (GS–5.1–10)

क्रामो दुत् क्राम क्रामो दक्रमी दक्रमी दुत् क्राम क्रामो दक्रमीत् ।

(3)[P11] 5.1.3.1(3)– उत् । अक्रमीत् । इति । (GS–5.1–10)

उदक्रमी दक्रमी दुदु दक्रमी दिती त्यक्रमी दुदु दक्रमी दिति ।

(4)[P11] 5.1.3.1(4)– अक्रमीत् । इति । द्वाभ्याम् । (GS–5.1–10)

अक्रमी दिती त्यक्रमी दक्रमीदिति द्वाभ्याम् द्वाभ्या मित्यक्रमी दक्रमी दिति द्वाभ्याम् ।

(5)[P11] 5.1.3.1(5)– इति । द्वाभ्याम् । उत् । (GS–5.1–10)

इति द्वाभ्याम् द्वाभ्या मितीति द्वाभ्या मुदुद् द्वाभ्या मितीति द्वाभ्या मुत् ।

(6)[P11] 5.1.3.1(6)– द्वाभ्याम् । उत् । क्रमयति । (GS–5.1–10)

द्वाभ्या मुदुद् द्वाभ्याम् द्वाभ्या मुत् क्रमयति क्रमय त्युद् द्वाभ्याम् द्वाभ्या मुत् क्रमयति ।

(7)[P11] 5.1.3.1(7)– उत् । क्रमयति । प्रतिष्ठित्यै ।

उत् क्रमयति क्रमय त्युदुत् क्रमयति प्रतिष्ठित्यै प्रतिष्ठित्यै क्रमय त्युदुत् क्रमयति प्रतिष्ठित्यै ।

(8)[P11] 5.1.3.1(8)– क्रमयति । प्रतिष्ठित्यै । अनुरूपाभ्याम् ।

क्रमयति प्रतिष्ठित्यै प्रतिष्ठित्यै क्रमयति क्रमयति प्रतिष्ठित्या अनुरूपाभ्या मनुरूपाभ्याम्
प्रतिष्ठित्यै क्रमयति क्रमयति प्रतिष्ठित्या अनुरूपाभ्याम् ।

(9)[P11] 5.1.3.1(9)– प्रतिष्ठित्यै । अनुरूपाभ्याम् । तस्मात् ।

प्रतिष्ठित्या अनुरूपाभ्या मनुरूपाभ्याम् प्रतिष्ठित्यै प्रतिष्ठित्या अनुरूपाभ्याम् तस्मात् तस्मा
दनुरूपाभ्याम् प्रतिष्ठित्यै प्रतिष्ठित्या अनुरूपाभ्याम् तस्मात् ।

(10)[P11] 5.1.3.1(9)– प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति – स्थित्यै ।

(11)[P11] 5.1.3.1(10)– अनुरूपाभ्याम् । तस्मात् । अनुरूपाः ।

अनुरूपाभ्याम् तस्मात् तस्मा दनुरूपाभ्या मनुरूपाभ्याम् तस्मा दनुरूपा अनुरूपा स्तस्मा दनुरूपाभ्या मनुरूपाभ्याम् तस्मा दनुरूपाः ।

(12)[P11] 5.1.3.1(10)– अनुरूपाभ्याम् ।

अनुरूपाभ्यामित्यनु – रूपाभ्याम् ।

(13)[P11] 5.1.3.1(11)– तस्मात् । अनुरूपाः । पशवः ।

तस्मा दनुरूपा अनुरूपा स्तस्मात् तस्मा दनुरूपाः पशवः पशवो ऽनुरूपा स्तस्मात् तस्मा दनुरूपाः पशवः ।

(14)[P11] 5.1.3.1(12)– अनुरूपाः । पशवः । प्र ।

अनुरूपाः पशवः पशवो ऽनुरूपा अनुरूपाः पशवः प्र प्र पशवो ऽनुरूपा अनुरूपाः पशवः प्र ।

(15)[P11] 5.1.3.1(12)– अनुरूपाः ।

अनुरूपा इत्यनु – रूपाः ।

(16)[P11] 5.1.3.1(13)– पशवः । प्र । जायन्ते ।

पशवः प्र प्र पशवः पशवः प्र जायन्ते जायन्ते प्र पशवः पशवः प्र जायन्ते ।

(17)[P11] 5.1.3.1(14)– प्र । जायन्ते । अपः ।

प्र जायन्ते जायन्ते प्र प्र जायन्ते ऽपो ऽपो जायन्ते प्र प्र जायन्ते ऽपः ।

(18)[P11] 5.1.3.1(15)– जायन्ते । अपः । उप ।

जायन्ते ऽपो ऽपो जायन्ते जायन्ते ऽप उपोपापो जायन्ते जायन्ते ऽप उप ।

(19)[P11] 5.1.3.1(16)- अपः । उप । सृजति ।

अप उपोपा पो ऽप उप सृजति सृज त्युपा पो ऽप उप सृजति ।

(20)[P11] 5.1.3.1(17)- उप । सृजति । यत्र ।

उप सृजति सृज त्युपोप सृजति यत्र यत्र सृज त्युपोप सृजति यत्र ।

(21)[P11] 5.1.3.1(18)- सृजति । यत्र । वै ।

सृजति यत्र यत्र सृजति सृजति यत्र वै वै यत्र सृजति सृजति यत्र वै ।

(22)[P11] 5.1.3.1(19)- यत्र । वै । आपः ।

यत्र वै वै यत्र यत्र वा आप आपो वै यत्र यत्र वा आपः ।

(23)[P11] 5.1.3.1(20)- वै । आपः । उपगच्छन्ति ।

वा आप आपो वै वा आप उपगच्छ न्त्युपगच्छ न्त्यापो वै वा आप उपगच्छन्ति ।

(24)[P11] 5.1.3.1(21)- आपः । उपगच्छन्ति । तत् ।

आप उपगच्छ न्त्युपगच्छ न्त्याप आप उपगच्छन्ति तत् तदुपगच्छ न्त्याप आप उपगच्छन्ति तत् ।

(25)[P11] 5.1.3.1(22)- उपगच्छन्ति । तत् । ओषधयः ।

उपगच्छन्ति तत् तदुपगच्छ न्त्युपगच्छन्ति तदोषधय ओषधय स्तदुपगच्छ न्त्युपगच्छन्ति तदोषधयः ।

(26)[P11] 5.1.3.1(22)- उपगच्छन्ति ।

उपगच्छन्तीत्युप - गच्छन्ति ।

(27)[P11] 5.1.3.1(23)- तत् । ओषधयः । प्रति ।

तदोषधय ओषधय स्तत् तदोषधयः प्रति प्रत्योषधय स्तत् तदोषधयः प्रति ।

(28)[P11] 5.1.3.1(24)– ओषधयः । प्रति । तिष्ठन्ति ।

ओषधयः प्रति प्रत्योषधय ओषधयः प्रति तिष्ठन्ति तिष्ठन्ति प्रत्योषधय ओषधयः प्रति तिष्ठन्ति ।

(29)[P11] 5.1.3.1(25)– प्रति । तिष्ठन्ति । ओषधीः ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठ न्त्योषधी रोषधी स्तिष्ठन्ति प्रति प्रति तिष्ठ न्त्योषधीः ।

(30)[P11] 5.1.3.1(26)– तिष्ठन्ति । ओषधीः । प्रतितिष्ठन्तीः ।

तिष्ठ न्त्योषधी रोषधी स्तिष्ठन्ति तिष्ठ न्त्योषधीः प्रतितिष्ठन्तीः प्रतितिष्ठन्ती रोषधी स्तिष्ठन्ति तिष्ठ न्त्योषधीः प्रतितिष्ठन्तीः ।

(31)[P11] 5.1.3.1(27)– ओषधीः । प्रतितिष्ठन्तीः । पशवः ।

ओषधीः प्रतितिष्ठन्तीः प्रतितिष्ठन्ती रोषधी रोषधीः प्रतितिष्ठन्तीः पशवः पशवः प्रतितिष्ठन्ती रोषधी रोषधीः प्रतितिष्ठन्तीः पशवः ।

(32)[P11] 5.1.3.1(28)– प्रतितिष्ठन्तीः । पशवः । अनु ।

प्रतितिष्ठन्तीः पशवः पशवः प्रतितिष्ठन्तीः प्रतितिष्ठन्तीः पशवो ऽन्वनु पशवः प्रतितिष्ठन्तीः प्रतितिष्ठन्तीः पशवो ऽनु ।

(33)[P11] 5.1.3.1(28)– प्रतितिष्ठन्तीः ।

प्रतितिष्ठन्तीरिति प्रति – तिष्ठन्तीः ।

(34)[P11] 5.1.3.1(29)– पशवः । अनु । प्रति ।

पशवो ऽन्वनु पशवः पशवो ऽनु प्रति प्रत्यनु पशवः पशवो ऽनु प्रति ।

(35)[P11] 5.1.3.1(30)– अनु । प्रति । तिष्ठन्ति ।

अनु प्रति प्रत्यन्वनु प्रति तिष्ठन्ति तिष्ठन्ति प्रत्यन्वनु प्रति तिष्ठन्ति ।

(36)[P11] 5.1.3.1(31)– प्रति । तिष्ठन्ति । पशून् ।

प्रति तिष्ठन्ति तिष्ठन्ति प्रति प्रति तिष्ठन्ति पशून् पशून् तिष्ठन्ति प्रति प्रति तिष्ठन्ति पशून् ।

(37)[P11] 5.1.3.1(32)– ति॒ष्ठ॒न्ति॒ । प॒शून् । य॒ज्ञः ।

ति॒ष्ठ॒न्ति॒ प॒शून् प॒शून् ति॑ष्ठन्ति तिष्ठन्ति प॒शून्. य॒ज्ञो य॒ज्ञः प॒शून् ति॑ष्ठन्ति तिष्ठन्ति प॒शून्. य॒ज्ञः ।

(38)[P11] 5.1.3.1(33)– प॒शून् । य॒ज्ञः । य॒ज्ञम् ।

प॒शून्. य॒ज्ञो य॒ज्ञः प॒शून् प॒शून्. य॒ज्ञो य॒ज्ञं ँय॒ज्ञं ँय॒ज्ञः प॒शून् प॒शून्. य॒ज्ञो य॒ज्ञम् ।

(39)[P11] 5.1.3.1(34)– य॒ज्ञः । य॒ज्ञम् । यज॑मानः ।

य॒ज्ञो य॒ज्ञं ँय॒ज्ञं ँय॒ज्ञो य॒ज्ञो य॒ज्ञं ँयज॑मानो॒ यज॑मानो य॒ज्ञं ँय॒ज्ञो य॒ज्ञो य॒ज्ञं ँयज॑मानः ।

(40)[P11] 5.1.3.1(35)– य॒ज्ञम् । यज॑मानः । यज॑मानम् ।

य॒ज्ञं ँयज॑मानो॒ यज॑मानो य॒ज्ञं ँय॒ज्ञं ँयज॑मानो॒ यज॑मानं॒ ँयज॑मानं॒ ँयज॑मानो य॒ज्ञं ँय॒ज्ञं
ँयज॑मानो॒ यज॑मानम् ।

(41)[P11] 5.1.3.1(36)– यज॑मानः । यज॑मानम् । प्र॒जाः ।

यज॑मानो॒ यज॑मानं॒ ँयज॑मानं॒ ँयज॑मानो॒ यज॑मानो॒ यज॑मानम् प्र॒जाः प्र॒जा यज॑मानं॒ ँयज॑मानो॒
यज॑मानो॒ यज॑मानम् प्र॒जाः ।

(42)[P11] 5.1.3.1(37)– यज॑मानम् । प्र॒जाः । तस्मा᳚त् ।

यज॑मानम् प्र॒जाः प्र॒जा यज॑मानं॒ ँयज॑मानम् प्र॒जा स्तस्मा॒त् तस्मा᳚त् प्र॒जा यज॑मानं॒
ँयज॑मानम् प्र॒जा स्तस्मा᳚त् ।

(43)[P11] 5.1.3.1(38)– प्र॒जाः । तस्मा᳚त् । अ॒पः ।

प्र॒जा स्तस्मा॒त् तस्मा᳚त् प्र॒जाः प्र॒जा स्तस्मा॑ द॒पो॑ ऽप स्तस्मा᳚त् प्र॒जाः प्र॒जा स्तस्मा॑ द॒पः ।

(44)[P11] 5.1.3.1(38)– प्र॒जाः ।

प्र॒जा इति॑ प्र – जाः ।

(45)[P11] 5.1.3.1(39)– तस्मा᳚त् । अ॒पः । उप॑ ।

तस्मा॑ द॒पो॑ ऽप स्तस्मा॒त् तस्मा॑ द॒प उपोपा॒प स्तस्मा॒त् तस्मा॑ द॒प उप॑ ।

(46)[P11] 5.1.3.1(40)– अपः । उप । सृजति ।

अप उपोपापो ऽप उप सृजति सृज त्युपापो ऽप उप सृजति ।

(47)[P11] 5.1.3.1(41)– उप । सृजति । प्रतिष्ठित्यै ।

उप सृजति सृज त्युपोप सृजति प्रतिष्ठित्यै प्रतिष्ठित्यै सृज त्युपोप सृजति प्रतिष्ठित्यै ।

(48)[P11] 5.1.3.1(42)– सृजति । प्रतिष्ठित्यै । यत् ।

सृजति प्रतिष्ठित्यै प्रतिष्ठित्यै सृजति सृजति प्रतिष्ठित्यै यद् यत् प्रतिष्ठित्यै सृजति सृजति प्रतिष्ठित्यै यत् ।

(49)[P11] 5.1.3.1(43)– प्रतिष्ठित्यै । यत् । अद्ध्वर्युः ।

प्रतिष्ठित्यै यद् यत् प्रतिष्ठित्यै प्रतिष्ठित्यै यदद्ध्वर्यु रद्ध्वर्युर् यत् प्रतिष्ठित्यै प्रतिष्ठित्यै यदद्ध्वर्युः ।

(50)[P11] 5.1.3.1(43)– प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति – स्थित्यै ।

(51)[P11] 5.1.3.1(44)– यत् । अद्ध्वर्युः । अनग्नौ ।

